ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया५ । ततो विभागः६ । ततः पूर्वसंयोगनाशः ७। तत आरम्भकसंयोगः८ । ततो द्व्यणुकोत्पत्तिः९। ततो रक्तााद्युत्पत्तिः१०। अथैकादश क्षणाः । वह्निसंयोगात् परमाणौ कर्म । ततो विभागः । ततो द्रव्यारम्भकसंयोगनाशः । ततो द्व्यणुकनाशः१ विशिष्टं कालमपेक्ष्य विभागजविभागः२ । ततः पूर्वसंयोगनाशः३ । तत उत्तरसंयोगः४। ततः परमाणुकर्मनाशः५। ततोऽदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणक्रिया६। ततो विभागः७। ततः पूर्वसंयोगनाशः८। ततो द्रव्यारम्भकसंयोगः९। ततो द्व्यणुकम्१०।ततो रक्तादि११। मध्यमशब्दवदेकस्मादग्निसंयोगात् श्यामनाशरक्तोत्पादौ । तावत्कालमेकस्याग्नेरस्थिरत्वात् । किन्तु यद्युत्पादको नाशकस्तदा नष्टे श्यामादावग्निनाशे नीरूपस्थिरं परमाणुः स्यात् । नाशकश्चेदुत्पादकस्तदा रक्तोत्पत्तौ तदग्निना रक्तता न स्यात् । एवं परमाण्वन्तरे कर्मचिन्तनात् पञ्चादिक्षणोऽपि गुणोत्पत्तिः । तथा हि एकत्र परमाणौ कर्म । ततो विभागः । तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी । ततस्तु द्व्यणुकनाशः । परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः१ । ततः श्यामादिनाशः विभागाच्च पूर्वसंयोगनाश इत्येकः कालः२ । ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोगश्चेत्येकः कालः३ । अथ द्व्यणुकोत्पत्तिः४ । अथ रक्तोत्पत्तिरिति५ पञ्च क्षणाः । द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षट्क्षणोत्पत्तिः । तथा हि परमाणुकर्मणा परमाण्वन्तरविभागः । तत आरम्भकसंयोगनाशः । अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी१ । अथ श्यामनाशः परमाण्वन्तरकर्मजश्च विभागः२ । ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च३ । ततः परमाण्वन्तरसंयोगः४ । ततो द्व्यणुकोत्पत्तिः५। अथ रक्तोत्पत्तिरिति६। एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात् सप्त क्षणाः । रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनात् अष्ट क्षणाः” इति । नैयायिकानामिति । नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति । तेषामयमाशयः । अवयविनां सच्छिद्रत्वादग्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते । वैशेषिकमतेऽनन्तावयवतन्नाशकल्पने गौरवात् । इत्यञ्च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते । यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियते” मुक्ता०। स्पर्शस्य बहुप्रकारता भा० प्रा० १८१ अ० उक्ता यथा “वायव्यश्च गुणःस्पर्शः स्पर्शश्च बहुधा स्मृतः । उष्णः१ शीतः२ सुखो३ दुःखः४ स्निग्धो५ विशद६ एव च । तथा खरो७ मृदु८ श्लक्ष्णो९ लघु१०र्गुरुतरो११ऽपि च” । कठिनस्याप्युपलक्षणमिदं यथोक्तं भा० आश्व० ५० अ० । “वायोरपि गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः । रूक्षः१ शीत२स्तथैवोष्णः३ स्निग्धो४ विशद५ खर६ एव च । कठिन७श्चिक्कणः८ श्लक्ष्णः९ पिच्छिलो१० दारुणो११ मृदुः १२। एवं द्वादशविस्तारो वायव्यो गुण एव च” । ३कादिमावसानवर्णानामुत्पादके आभ्यन्तरप्रयत्ने सि०कौ०।

**स्पर्शतन्मात्र** न० सांख्यमतसिद्धे वायूपादानकारणे स्पर्शमात्रगुणके सूक्ष्मभूतभेदे तन्मात्रशब्दे दृश्यम् ।

**स्पर्शन** न० स्पर्श—स्पृश—वा ल्युट् । १प्रहणे २स्पर्शे च । णिच् ल्युट् । ३दाने च मेदि० । स्पृश-कर्त्तरि ल्यु । ४वायौ पु० अमरः । [लज्जालुहक्षे शब्दर० ।

**स्पर्शलज्जा** स्त्री स्पर्शमात्रेण लज्जते सङ्कोचात् लज्ज—अच् ।

**स्पर्शशुद्धा** स्त्री स्पर्शे शुद्धा । शतमूल्यां शब्दच० ।

**स्पर्शा** स्त्री स्पर्श ग्रहणे-कर्मणि घञ् । कुलटायां धरणिः तस्याः सर्वैर्ग्रहणत्वात्तथात्वम् । [अच् । स्पृष्टाधन ।

**स्पर्शाज्ञता** स्त्री त्वक्शून्यत्वाख्ये वातरोगभेदे “स्पृश्यमाना त्वचा या तु शीतोष्णं मृदु कर्कशम् । न जानाति बुधैः सा तु त्वक्शून्यत्वेति परिकीर्त्तिता” भावप्र० ।

**स्पर्ष्टृ** त्रि० स्पृश-तृच् । १उपतापयितरि स्त्रियां ङीप् । २रोगे पु० भरतः । कृतोरसृ स्पष्ट तत्रार्थे त्रि० ।

**स्पश** ग्रन्थे बाधने च भ्वा० उभ० सक० सेट् । स्पशति-ते अस्पशीत्—अस्पाशीत् । अस्पशिष्ट ।

**स्पश** पु० स्पश—अच् । १चरमात्रे २अभिसरे (युद्धे) ३गूढचरे च अमरः “राजनीतिरपस्पशा” माघः ।

**स्पष्ट** त्रि० स्पश-क्त नि० इडभावः । १व्यक्ते २स्फुटे अमरः

**स्पृ** प्रीतौ अक० प्रीणने रक्षणे पालने च सक० स्वा० पर० अनिट् । स्पृणोति अस्पार्षीत् ।

**स्पृक्का** स्त्री स्पृश—क्क पृषो० शस्य कः । पृक्कायाम् भरतः ।

**स्पृश** स्पर्शे तु० पर० सक० अनिट् । स्पृशति अस्प्राक्षीत् अस्पार्क्षीत् अस्पृक्षत् । पस्पर्श ।

**स्पृशा** स्त्री स्पृश—क । १सर्पघातिनीवृक्षे (कङ्कालिका) शब्दर० २कण्टकार्य्यां स्त्री अमरः गौरा० ङीष् ।

**स्पृष्ट** त्रि० स्पृश—क्त । १कृतस्पर्शे । भावे क्त । २स्पर्शे न० । ३कादिमावसानवर्णोत्पादके आभ्यन्तरप्रयत्ने न०।